# श्रीसुरसरस्वतीसभा, शृङ्गेरी

## तृतीया परीक्षा - प्रथमपत्रिका

**दिनाङ्कः** – 04-02-2024 **अङ्काः** – १००

**पूर्वाह्णः** – १०:०० तः १:०० पर्यन्तम् **समयः** – होरात्रयम्

ಸೂಚನೆಗಳು: ೧. ಸಂಸ್ಕೃತದಲ್ಲಿ ಬರೆಯುವ ಉತ್ತರಗಳು ದೇವನಾಗರೀಲಿಪಿಯಲ್ಲೇ ಇರಬೇಕು.

೨. ಪ್ರಶ್ನೆಗಳ ಕ್ರಮಾಂಕಗಳನ್ನು ತಪ್ಪದೇ ಬರೆಯಿರಿ.

Instructions: 1. Write the Samskrita answers in Devanaagari script only.

2. Write the question numbers correctly.

1. **पञ्चानां संस्कृते एकवाक्येन उत्तरं लिखत ।** 5

१. विष्णुः कैः ध्यानगम्यः ?

२. कविकुलगुरुः कः ?

३. शुकशावकयोः नाम किम् ?

४. शङ्कराचार्यस्य मातापितरौ कौ ?

५. धर्मव्याधः कुत्र न्यवसत् ?

६. मल्लस्य नाम किम् ?

2. **षण्णां द्वित्रैः वाक्यैः उत्तरं लिखत ।** 12

१. श्रीशङ्कराचार्यैः कुत्र कुत्र मठाः स्थापिताः ?

२. षट् दोषाः के ?

३. भुजङ्गमः रोषात् किमकरोत् ? परिणामः किमभवत् ?

४. कथम् अनार्यः पतति ?

५. शङ्कराचार्यस्य शिष्याः के ?

६. हनुमान् सीतां कथम् आश्वासयामास ?

७. भूतानां प्रलयोदयौ कौ ?

3. **त्रयाणां पञ्चषैः वाक्यैः संस्कृतेन उत्तरं लिखत ।** 9

१. विष्णुशर्मणः प्रतिज्ञा का ?

२. मल्लस्य सामर्थ्यं विशदयत ?

३. द्रोणः एकलव्याय किमुत्तरं प्रायच्छत् ?

४. ब्राह्मणपुत्रः दीनारकं दृष्ट्वा किं चिन्तितवान् ?

4. **चतुर्णां मातृभाषया दशभिः वाक्यैः उत्तरं लिखत ।** 12

१. चित्रग्रीवस्य कथां लिखत ।

२. विक्रमस्यौदार्यं विशदयत।

३. 'ब्राह्मणः सर्पश्च' कथां लिखत।

४. शुकशावकयोः कथां निरूपयत ?

५. पतिव्रतायाः महत्त्वं वर्णयत।

5. **चतुर्णां ससन्दर्भं मातृभाषया विवृणुत ।** 12

१. "स च वेदवेदाङ्गवित्" ।

२. "अतिथिसत्कारः श्रेयस्करः" ।

३. "मुखरः तत्र हन्यते" ।

४. "अर्जुन ! त्वां लोकोत्तरं धनुर्धरं करिष्यामि" ।

५. "प्रभूतधनेन योजयिष्यामि" ।

6. **द्वयोः अन्वयानुसारम् अर्थं मातृभाषया लिखत ।** 4

१. जयन्ति ते सुकृतिनो रससिद्धाः कवीश्वराः ।
नास्ति तेषां यशःकाये जरामरणजं भयम् ॥

२. यथा कन्दुकपातेनोत्पतत्यार्यः पतन्नपि ।
तथा त्वनार्यः पतति मृत्पिण्डपतनं यथा ॥

३. अभिवाद्याथ सकलान् अमरान् पवनात्मजः ।
पुप्लुवे च गिरेस्तस्माद्विलङ्घयितुमर्णवम् ॥

7. **श्लोकद्वयं पूरयत ।** 4

१. वागीशाद्याः -------------- गजाननम् ॥

२. निन्दन्तु ----------------------धीराः ॥

३. रविनिशाकरयोः -------------मे मतिः ॥

8. **अस्य गद्यस्य अनुवादं कुरुत।** 3

शङ्करः यदा त्रिहायनोऽभवत् तदा तस्य पिता दुर्दैवात् कालवशं गतः । जननी पत्युर्वियोगेन खिन्नापि महातेजस्विशिशुरक्षणे बद्धादराभवत् । पञ्चमवत्सरे बन्धुभिः तस्य उपनयनं कारयामास । अनुपदमेव गुरुकुलमुपनीतः स वटुः द्वित्रैरेव वर्षैः सर्वान् वेदान् वेदाङ्गानि विविधाः भाषाश्च अधीतवान् ।

9. **रिक्तस्थानानि पूरयत ।** 3

१. नूनं ________ वल्मीकः ।

२. षोडशे कृतवान् ________ ।

३. नीतिविदा पुरुषेण ________ न कथनीयम् ।

10. **त्रयाणां पर्यायपदानि लिखत ।** 3

१. सुमनाः २. विचक्षणः ३. देवाः ४. तोयम्

11. **त्रयाणां विरुद्धपदानि लिखत ।** 3

१. बन्धनम् २. आदिः ३. हितः ४. शुभम्

12. **त्रीणि पदानि संस्कृतवाक्येषु योजयत ।** 3

१. अमात्यः २. गत्वा ३. आवेद्य ४. भवतु

13. **त्रयाणां सन्धिं विभज्य सन्धिनाम लिखत ।** 3

१. रामश्च २. स एवम् ३. इत्येनाम् ४. तत्रैव

14. **वाक्यदोषं परिहरत । (त्रयाणाम् एव)** 3

१. भवान् वद । २. रविः सीता च पठति ।

३. सीता रामस्य सह गच्छति । ४. रामं नमः।

15. **सुबन्त-तिङन्त-अव्ययानि पृथक् कृत्वा लिखत ।** (द्वावेव) 3

**१.** महाराजं प्रणिपत्य विज्ञापयति स्म ।

२. राजा तस्य वचनं श्रुत्वा तस्मै तत्फलं प्रायच्छत् ।

३. कथम् कार्यं कर्तुं शक्नुयुः?

16. **लोकोक्तिं पूरयित्वा मातृभाषया विवृणुत। (त्रयाणामेव)** 6

१. चक्रार -------- पङ्क्तिः ।   ३. प्रक्षालनात् -------- वरम् ।

२. याञ्चा ------लब्धकामा ।   ४. यादृशं -------- तादृशी ।

17. **संयोज्य लिखत ।** 4

| अ | आ |
|---|---|
| अलिखत् | लोट् |
| कुर्वन्तु | लट् |
| वन्दे | लिट् |
| पपाठ | लङ् |

18. **रेखाङ्कितपदमधिकृत्य प्रश्नवाक्यं कुरुत।** 2

१. पञ्च पाण्डवाः आसन् ।   २. बालया शाला गता ।

19. **समूहेतरपदं पृथक् कृत्वा लिखत।** 2

१. रामाय, गणेशाय, रवये, विहाय ।   २. पठ, लिख, वद, नमतु ।

20. **चतुर्थपदं लिखत।** 2

१. समवेताः - आगताः :: सन्नद्धाः -----

२. षडाननः – जरत्व :: वाङ्मयम् -----

21. **प्रयोगपरिवर्तनं कुरुत।** 2

१. अहं फलं खादामि ।   २. तेन कार्यं न कृतम् ।

---------------